तित्रप्सकः-प्सिका, [1]तात्रपकः-पिका ;

त्रपिता-त्रप्ता-त्री, त्रपयिता-त्री, तित्रपिषिता-तित्रप्सिता-त्री, तात्रपिता-त्री ;

— त्रपयन्-न्ती, त्रपयिष्यन्-न्ती-ती ; — —

त्रपमाणः, त्रपयमाणः, तित्रपिषमाणः-तित्रप्समानः, तात्रप्यमानः ;

त्रपिष्यमाणः-त्रप्स्यमानः, त्रपयिष्यमाणः, तित्रपिषिष्यमाणः-तित्रप्सिष्यमाणः, तात्रपिष्यमाणः ;

त्रप्-त्रपौ-त्रपः ; — — —

[2]त्रप्तम्-त्रप्तः-त्रप्तवान्, त्रपितः, तित्रपिषितः-तित्रप्सितः, तात्रपितः-तवान् ;

त्रपः, [3]अपत्रपिष्णुः[A], [4]त्रेपिवान्, त्रपः, तित्रपिषुः-तित्रप्सुः; तात्रपः ;

त्रपितव्यम्-त्रप्तव्यम्, त्रपयितव्यम्, तित्रपिषितव्यम्-तित्रप्सितव्यम्, तात्रपितव्यम् ;

त्रपणीयम्, त्रपणीयम्, तित्रपिषणीयम्-तित्रप्सनीयम्, तात्रपणीयम् ;

[5]त्राप्यम्, त्रप्यम्, तित्रपिष्यम्-तित्रप्स्यम्, तात्रप्यम् ;

ईषत्त्रपः-दुस्त्रपः-सुत्रपः ; — —

त्रप्यमाणः, त्रप्यमाणः, तित्रपिष्यमाणः-तित्रप्स्यमानः, तात्रप्यमाणः ;

त्रापः, त्रपः, तित्रपिषः-तित्रप्सः, तात्रपः ;

त्रपितुम्-त्रप्तुम्, त्रपयितुम्, तित्रपिषितुम्-तित्रप्सितुम्, तात्रपितुम् ;

[6]त्रपा, त्रपणा, तित्रपिषा-तित्रप्सा, तात्रपा ;

त्रपणम्, त्रपणम्, तित्रपिषणम्-तित्रप्सनम्, तात्रपणम् ;

त्रपित्वा-त्रप्त्वा, त्रपयित्वा, तित्रपिषित्वा-तित्रप्सित्वा, तात्रपित्वा ;

---

1. यङन्ते, 'दीर्घोऽकितः' (7-4-83) इत्यभ्यासस्य दीर्घः । एवं सर्वत्र ज्ञेयम् ।
2. ऊदित्त्वेनेड्विकल्पनात्, निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इति इण्निषेधः ।
3. 'अलङ्कृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतु—' (3-2-136) इत्यादिना तच्छीलतद्धर्मतत्साधुकारिष्वर्थेषु कर्तरि इष्णुच् प्रत्ययः ।
4. क्वसुप्रत्यये, 'तॄफलभजत्रपश्च' (6-4-122) इत्येत्वाभ्यासलोपे च रूपम् । 'पपुषः आगतम्—पपिवद्रूप्यम्' इति 'विभाषा पूर्वाह्णापराह्णाभ्याम्' (4-3-24) इति सूत्रे भाष्यकारप्रयोगात् छन्दसि विहितोऽपि क्वसुः भाषायामपि क्वचिद् भवति ।
5. 'आसुयुवपिरपित्रपिचमश्च' (3-1-126) इति यदपवादो ण्यत् ।
6. धातोरस्य षित्त्वात् स्त्रियाम्, 'षिद्भिदादिभ्योऽङ्' (3-3-104) इत्यङ् भावे ।

A. 'पर्यच्छे सरसि हृतेंऽशुके पयोभिर्लोलाक्षे सुरतगुरावपत्रपिष्णोः' । शि. व. 8-46 ।